folio 1-73 comp.
missing folio 30

104

Total - 23 folios

1

श्रीगणेशाय नमः ॐ वरदं हि वदाद्रिशेखरं कमलासदयितं दयानिधिं सकलार्थिजनार्थितप्रदं शरणं यामि शरणार्तिहारिणं १ कृत्वानवद्यं निगमांतसाधां
निराकृतं येन भयं श्रुतीनां प्रतारितानां बहुभिर्वितंडैः रामानुजं योगिनमाश्रयामः २ अशेषेत्यादिश्लोकद्वयेन शारीरिकप्रकरणार्थं विवक्षुः समाप्त्यर्थं शिष्ट
णां तन्मात्रसिद्ध्यर्थं च सत्याचारप्राप्तत्वात् मंगलमाचरति श्रोतृबुद्धिसमाधानार्थं शास्त्रार्थः प्रतिपाद्यं संक्षेपश्च क्रियते तत्रेष्टदेवतोपासनारूपमंगला
रः स्वपक्षस्थापनारूपप्रतिपाद्यसंक्षेपश्च श्लोकद्वयेन क्रियते प्रथमश्लोकेन स्वपक्षे च प्रतिपाद्यमुपायोपेयात्मकं तत्र वस्तुसिद्धरूपमुपेयं चतुर्थ्यंतैः प
दैरुच्यते नमः शब्देनोपायः पर्यस्तूच्यते तत्रोपेयस्य ब्रह्मण उभयविभूतिविशिष्टं पूर्वार्धेनोच्यते निर्मलेत्यादिपदेनोभयलिंगत्वमुच्यते तत्र विप्रतिपत्तिं
दैरुच्यते अशेषचिदचिद्वस्तुशेषिण इति प्रथमपदेन अगतब्रह्मणस्तत्सामानाधिकर
ण्यस्य तत्त्वमसीति वाक्यस्यार्थनिष्कर्षेण मुखेन लीलाविभूतिचेतनविशिष्टत्वमुच्यते अशेषचिदचिद्वस्तुशेषिण इति प्रथमपदेन अगतब्रह्मणस्तत्सामानाधिकर
ण्यं शरीरशरीरिभावनिबंधनं शरीरत्वं च चेतनं प्रत्यनन्यार्हशेषत्वं एवं सामानाधिकरण्यस्य देवशरीरिभावनिबंधनत्वे सतिभेदश्रुतिभिरप्यैकश्रुतिभि
श्च वाक्यस्याविरोधः अशेषपदं चेतनबहुत्वं दर्शयति कतिपयचेतननियंतृताप्यावृतिस्थानेनसिद्ध्यति वस्तुशब्देन परमार्थत्वं विवक्षितं अशेषवस्तुशेषिण
इत्येतावता लं किमर्थं चिदचिच्छब्दप्रयोग इति चेत् उच्यते यादवप्रकाशमते सर्वमपि चेतनमेव तत्र त्वचादेश्चेतन्यानभिव्यक्तिमात्रमेवेति न चिदचिद्विभागः इति
तव्यावृत्तिः चिदचिच्छब्दाभ्यां किंच मायिमते जीवब्रह्मणोः सामानाधिकरण्यं स्वरूपैक्यनिबंधनं अचिद्ब्रह्मणोस्तु बाधार्थं इति सामानाधिकरण्यस्य
नैकरूप्यं इति तद्व्यावृत्तिः स्यादिति भेदा किंच भास्करमते जीवब्रह्मणोर्भेदश्रुतय औपाधिकभेदविषयाः अचिद्ब्रह्मणोर्भेदश्रुतयः स्वाभाविकभेदविषया इ
तिभेदश्रुतीनां नैकरूप्यमुपगतं इति तद्व्यावृत्तिः स्यादित्येतानि दोषइति वक्तव्ये अकारस्य मंगलार्थत्वात् अशेषेत्युक्तं एवं लीलाविभूतिविशिष्टत्वमुक्तं

२

र्शनशालि संसरति भेददर्शनकृतजन्मजरामरणादिसंसारिकदुःखभागीत्यर्थः एवं शंकरमतमुपन्यस्य अथ भास्करमतमुपन्यस्यते तस्यरोपाध्यालीढं पर
शब्देनोपाध्यंतरनिरपेक्षं स्वत एव ब्रह्मणस्तद्विभिन्नत्वमुच्यते परामुपगतमिथ्याभूताविद्यान्यत्वं च विवक्षितं आलीढं संबद्धं विपर्यं कर्मेपरवशं अथ
पादवप्रकाशमतं अस्तु भक्तास्पदमिति अचिद्गतपरिणामाहंतारूपाशुभस्य चिद्गतापुरुषार्थयोग्यतारूपाशुभस्यास्पदमित्यर्थः जीवब्रह्मणोर्भेदस्य स्वाभा
विकत्वाभ्युपगमात् तत्र स्वत एव पुरुषार्थान्वयः इति वैषम्यं दुर्वचं अभेदस्यापि स्वाभाविकत्वाभ्युपगमेनापुरुषार्थान्वयादिति भावः अचिद्ब्रह्मणोर्भेदाभेदौ स्वाभाविकौ
चिद्ब्रह्मणोर्भेद एव स्वाभाविकः भेदस्त्वौपाधिकः मुक्तावभेदवचनादिति भास्करमतं चिद्ब्रह्मणोरपि भेदाभेदौ स्वाभाविकौ मुक्तौ भेदस्यापि निर्देशादिति यादवप्रका
शमतं तस्माद्वृक्तावेवार्थं अस्तु भक्तास्पदमिति पदेन यादवप्रकाशमतोपन्यासः परं ब्रह्मेत्यादिपदेन शंकरमतोपन्यासः तन्मरोपाध्यालीढमित्यादिपदेन भास्करम
तन्यासः इत्तरद्वयं सिद्धमिति केचित् तदानीमस्तु भक्तास्पदमित्यचिद्गताशुभास्पदत्वमुच्यते ततो पि पक्षद्वयोपन्यासः इति निर्बोधोऽवरं कस्यचिन्मतस्यापि ग्रथित
त्वादष्यवांतरविभागस्य कल्पयत्वोपपत्तेः इति शब्दः पक्षत्रयोपन्यासपरः अथ तन्निरासं संक्षेपः श्रुतिन्यायापेतमिति श्रुतिः वेदः तदनुग्राहकस्तर्को न्यायः
तन्मतसाधकं तर्कानुगृहीतं प्रमाणं वेत्तीति भावः तन्निरासे किं कारणमित्यत्राह श्रुतिन्यायापेतमिति श्रुतिन्यायापेतमिति प्रसिद्धत्वान्न तन्निरासे यत्नः का
न४ र्यः इति चेत् तत्राह मोहेमिदं तम इति तमः यथार्थज्ञानावरणं मोहनं अपरमार्थे सम्यगर्थधीहेतुः अपास्तं दूरतउत्सारितमित्यर्थः परमतनिरासः सही
त्यादिना गुरूपासनमुक्तं जयत्यतिबलो राम इतिवत् सहि विजयत इत्युक्तं अनेन नर्यकार्यकार्यस्य सांप्रदायिकत्वमुक्तं भवति एवमादौ समस्तस्याप
नंपरपक्षप्रतिक्षेपसंक्षेपं कुर्वता देवतागुरूपासनरूपोभयविधं मंगलं श्लोकमाचरितं भवति तथा पूर्वैरनुष्ठितं नमस्कृत्य हृषीकेशं नमो भगवते तस्मै व्या
सायेत्यादिषु तथा च श्रुतिः यस्य देवेत्यादि अथ प्रथमश्लोकार्थमीषद्विस्तरेणावदन् प्राकरणिकमर्थं सप्रमाणकं प्रतिजानीते अशेषजगद्धितेत्यादिना
नास्तीत्यर्थः यथाश्रुतिन्यायापेतं [illegible] २

५ तुर८

धवतिनिर्मलविभूतियावणामाह शेषमगाप्यिनइति शेषः शेषः पत्नीपरिजनादेः प्रदर्शनार्थः तात्कालिकप्रत्ययांतत्वात् भोगविभूतिसंबंधस्य स्वाभाविकतया
नित्यत्वमभिप्रेतं एवमुभयविभूतिविशिष्टत्वमुक्तं अथोभयलिंगत्वमाह निर्मलानंतकल्याणनिधय इति निर्मलानंतस्य कल्याणनिधिश्चेति निर्मला
नंतकल्याणनिधिः निर्गुणं निरंजनं निरवद्यं अपहतपाप्मा समस्तहेयरहितं विष्ण्वाख्यं परमं पदं इत्यादिश्रुतिविशेषणेन निर्दोषत्वादिश्रुतिपदानां
प्रयोगात् नैर्मल्यं हेयप्रत्यनीकत्वं निर्मलत्वं च परिच्छिन्नेषु केषुचिदाकृतवस्तुष्वप्यस्तीति तद्व्यावृत्त्यर्थं समस्तेतरपरित्यागपूर्वकं प्राप्यत्वादिसिद्ध्यर्थं च
तदुपयोग्यानंत्यमाह अनंतेति अनंतपदेन अनेन वाङ्मनसानिवृत्तमुक्तिरूपार्थगुणनिषेधपरिहारस्याभिप्रेतः कल्याणशब्देनानुकूलवाचितादानंदाभि
धायी नहि प्रतिकूलोपदेश्येषु कल्याणशब्दप्रयोगः यद्वा अनुकूलवेदनीयत्वात्सर्वे गुणाः कल्याणशब्दवाच्या निर्मलकल्याणशब्दाभ्यां सामान्यविशेषाभ्यां ऽपांद
बलीवर्दन्यायाभिप्रेतो निधिशब्देन गुणगुणिभावो विवक्षितः अनेनानंदो ब्रह्मेत्यादिष्वानंदशब्दस्यानंदवाचित्वं सिद्धमेवेत्यभिप्रेतं आनंदं ब्रह्मणो विद्वान्
इति व्यतिरेकनिर्देशात् एवं हेयप्रत्यनीकत्वकल्याणगुणैकतानत्वरूपोभयलिंगत्वं ब्रह्मण उक्तं विष्णुशब्दो धर्मिनिर्देशकः अनेन शेषित्वमंतर्यामित्वपर्यंतं विशेषि
रितं रुद्रादेवताविशेषनिर्णयस्य एवं चतुर्थ्यंतैः परैः रूपेयवस्तुनिरूपणं अथोपायं सूचयति नम इति मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु इत्यत्र मद्
क्तशब्दस्य प्रतिपदमन्वयेन नमस्याया भक्तिं तद्भावानुध्याना चैव प्रणामादिरिति सिद्ध्यते एवं देवतोपासनरूपमंगलाचारः श्रौतः कृतः प्रतिपाद्यस्य पदार्थस्य पनसं
क्षेपश्चार्थकृतः अथ द्वितीयेन गुरूपासनरूपमंगलाचारः श्रौतः क्रियते अर्थः प्रतिपाद्यस्य पदार्थस्य निष्कर्षं संक्षेपश्च क्रियते तत्र पूर्वार्द्धेन परतत्त्वोपन्यासः संक्षेपः
उत्तरार्द्धेन तन्निरासः संक्षेपः परं ब्रह्मैवेत्यादि परं हेयप्रत्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणं एवकारो विरोधं स्फोरयति अभिमतदुरितापहत्वेन तदि
ष्टफलप्रदत्वेन च परहास्य यस्त्री यत्तदे [illegible] तत एव भ्रमपरिगतं विविधभेदद

मानस्थितत्पदार्थप्राधान्यं २

३ य: सर्वे उपायशरीरांतर्गता: वर्णाश्रमधर्मा: प्रतिमादिस्थानीया आग्नेयादिवद्दूरस्थाने ध्यानार्चनप्रणामादि: ध्यानं मानसं नामसंकीर्तनं वाचिकं अर्चे
नादिकायिकं च कर्मत्रयमपि तद्वै तथापि तद्विपाकरूपपरभक्त्यपेक्षया अर्चनादितुल्यव्यवहार: एवं त्रिविधमुपासनं यथा मन्मना भव मद्
भक्तो मद्याजी मां नमस्कुरु सततं कीर्तयंतो मां यतंतश्च दृढव्रता: स्मरणं कीर्तनं विष्णो: श्रवणं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं इति पुंसार्पि
ता विष्णौ भक्तिश्चेन्नवलक्षणा इत्यादि मद्याजी मदर्चनपर: वेदनध्यानादिशब्दैरन्यतमो भक्त्यवच्छर्चनप्रणामादिसहितस्योपायत्वं न्यायसूत्यनुग्र
हीतश्रुतिसिद्धं तत्र सामान्यविशेषन्यायाद्वेदमादिशब्दानां ध्यानादिपरत्वसिद्धिवत् स्मृत्यनुगृहीतत्वादर्चनप्रणामादिसहितध्यानपरत्वसिद्धिरि
त्यर्थ: तस्मात् ध्यानार्चनप्रणामादि: सर्वोप्युपेयविरोधिनिरासक: अत्यर्थप्रिय इति ध्यानार्चनप्रणामादि: सर्वोप्यत्यर्थप्रीतिपूर्वक: कार्य: मन्मना
भवेत्यादिवचने मद्भक्तो मन्मना भव मद्भक्तो मद्याजी भवेति इति पदं मद्भक्तपदान्वयादिति भाव: एवं प्रथमश्लोकसंक्षिप्तमुपायस्वरूपं विस्तृतं उपेयमाह
तत्त्वाप्तिफल इति अयमर्थ: इत्यर्थशब्दस्य विशेषणत्वात् सुश्लिंगता पूर्वमुपायस्यातिसंक्षिप्तत्वेन तद्विवरणत्वाद्रासिन्नग्रंथ उपायप्रधाननिर्देश: उपेयं
निर्विशेषज्ञप्तिमात्रं निवर्त्यं मिथ्यारूपमविद्यादिकं उपायो वाक्यार्थज्ञानमात्रं नादिमिथ्यासर्पो रज्जुध्याननिवर्त्य: अपितु नायं सर्प इति विज्ञान
मात्रनिवर्त्य: तस्मात्त्वमवद्युक्तस्योपायतेत्यत आह आस्येति परमात्मैक्यानुपपत्तये तद्विरुद्धस्वभावतया प्रत्यक्षसिद्धत्वमुच्यते आस्येतिपदेन अ
नादिशब्देनान्योन्याश्रय: परिहृत: … अयनां चाप्यविद्यायास्वरूपं कुलनंदन अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मति: इत्युक्तप्रका
राविद्याभिप्रेता तया संचितं अविद्यासंचितं कर्मेति हि स्मृतिं उद्देशेपण्णादिव्याकृत्यर्थं पुण्यपापशब्द: कथं पुण्यस्याविद्यासंचितत्वं तद्धि देहा
तिरिक्तात्मस्वानवत्तानुष्ठीयते उच्यते यथात्मनो देहादिविलक्षणत्वादेहात्मज्ञानमविद्या तद्वत्ता च यापंक्रियते एवमात्मनो भगवच्छेषत्वात्स्वतं
त्रात्मज्ञानमप्यविद्या तन्मूलस्वर्गादिफलदकर्मानुष्ठानमिति पुण्यस्याविद्यासंचितत्वोपपत्ति: देहात्माभिमानिभिर् जडत्वादिधर्मक
आत्मनि जडत्वाद्यारोपवत् भगवदात्मक आत्मनि तन्निष्ठस्वनिष्ठत्वारोपणं भ्रांतिरेव तथा विद्यैव हि सा एवंविधकर्मप्रवाहहेतुकमनुर्वे
धदेहप्रवेश: तत्कृततत्तद्देहेष्वात्माभिमान: अनात्मन्यस्वे च … आत्मीयधिया कर्म कर्मणा च शरीरप्रवेश: तच्छरीरसंबंधेनाविद्योतिश्चा ३

अस्येति नित्यमिति नित्यमुक्तसिद्धेन श्रुतिशब्देन वेदस्यापौरुषेयत्वान्निर्दोषत्वमभिप्रेतं निकरशब्देनाभिधीयमानकृत्स्नतत्त्वार्थपर्यालोचनं विवादितं तं ज्ञाप
नन्यपरभागासिद्ध इति दर्शयितुं शिरःशब्दः वक्ष्यमाणाभिप्रायेणायमर्थः इत्युक्तं समधिगतलक्ष्मणाधिगतः अनधीतशाखान्तरार्थप्रतिपादके नेहाप्युप
णादिभिस्तदाधिगतस्यार्थः अगतो मिथ्यात्वाद्भवदभिमतो यौपराः स्युरयः अपितु निर्विशेषत्वं तु ज्ञानस्यैव मोक्षोपायत्वप्रतिपादनपरा इति शंकां तु दस्य
ति अशेषजगद्धितानुशासनेति जगद्धितज्ञापनप्रवृत्तस्य वेदस्य पूर्वमेव भ्रान्ते जगति प्रत्यक्षाद्यनवगतमर्थमान्तरोत्पादकत्वमनुपपन्नमिति तदभिप्रायः हितम्
पायोपायात्मकं अनुशासनं विविच्य ज्ञापनं अनुपूर्वः शासिः विविच्य ज्ञापनार्थो दृष्ट इति शब्दात् अशेषजगच्छब्देन सर्वाधिकारिण उच्यन्ते हितानुशासन
परो वेदः कथं हिंसाद्यपुरुषार्थबोधक इति चेत् न तदधिकारिविशेषापेक्षया पुरुषार्थत्वमस्तीति तद्बोधनं न हि श्येनेनाभिचरन् यजेतेति कथं पापतममत्यन्तानि
ष्टं कर्म विदधातीति चेत् उच्यते तत्र भक्तिविशेषे वा लौकिक सच्चिन्वशीकर्तुं यद्वा वेद ब्राह्मणहिंसकादिदुष्टनिग्रहार्थत्वेन तस्य चहितत्वमस्त्विति तदभिप्राय अभि
चारादिकर्माराधत्वतन्नामफलप्रदत्वरूपभगवदैश्वर्यविशेषज्ञापनेन तदभिधायिशास्त्रस्यापि हितपरत्वमिति प्रथमश्लोके उपायस्याति संक्षेपेण सूचितत्वान्न विस्त
रेण वदन् प्रतिज्ञातस्यार्थस्य शरीरमाह जीवेत्यादिना याथात्म्यशब्देन तत्त्वमसीति वाक्ये त्वंपदस्य चेतनद्वयात्मकत्वं सूचितं एतदात्म्यमिदं सर्वं तत्सत्यमिति परमा
त्मात्मकत्वं सत्यं इत्युक्तं तस्माद्याथात्म्यशब्दस्यायमेवाभिप्रायः ज्ञानपूर्वकशब्देन वा कार्यज्ञानमात्रस्यानुपायत्वं सूचितं वर्णाश्रमधर्मेति कर्तव्यताकशब्देन कर्म
णो विविदिषासाधनत्वं समुच्चयवादश्च व्यावर्तितौ परमपुरुषपदेन ध्येयस्य हेयप्रत्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणत्वं देवताविशेषत्वं चो
क्तं तमेवं विद्वान्नान्यः पन्था इति श्रीपुरुषसूक्तानुरोधात् चरणयुगलशब्देन स्वामिनि दास्यानुगुणास्थितिर्दर्शिता सर्वदा चरणद्वंद्वं व्रजामीत्यादिवचना
नुगुण्यात् ध्यानार्चनप्रणामादि इत्यादिशब्देन [illegible] ध्यानार्चनप्रणामकीर्तनयत्नाः

देवादिभेदवचसा

४ दिप्रकृतिपरिणामविशेषरूपेति प्रकृतिपरिणामनिबंधनो विशेषः प्रकृतिपरिणामविशेषः तद्रूपः नानाविधप्रादुर्भावो देवमनुष्यादि भेदो दुःखितत्वांतरभे
दश्च विवक्षितः ज्ञानानंदैकगुणकमित्यनेनानिर्वाणमयएवायमात्मा ज्ञानमयो मलः दुःखाज्ञानमलात्मभिः प्रकृतेस्तेन चात्मनः इत्ययमर्थोभिप्रेतः ज्ञाना
नंद विशेषगुणकत्वेन स्वादि गुणकं ज्ञानानुज्ञानमात्रस्वरूपे कथं देवादिभेदराहित्यं प्रत्यक्षानुमानागमैस्तथा हि प्रतिपत्तिरितिशंकायां प्रत्यक्षादीविशारी
रसंबंधात्मविषयाणि निष्कृष्टात्मविषयवाक्यानि भेदराहित्यं वदंतीति वदन्नभेदशंकां च परिहरति तत्रैव तानि ज्ञातैतन्मात्रस्वदाविकानि विदूवचां
रूप सिद्धार्थानि भवंति तस्येति ज्ञानानंदैकस्वरूपत्वं विवक्षितं एतस्येति शरीरसंबंधोभिप्रेतः कर्मकृतदेवादिभेदप्रध्वस्त इत्यनेन एकस्वरूपभेदोदिवाहारकर्मसं
प्रवृत्ति जः देवादिभेदप्रध्वस्तेनात्मत्वावरणेहि सइत्ययमर्थो विवृतो भवति स्वरूपभेदो वाचामगोचरः स्वसंवेद्य इत्यनेन प्रत्यक्त्वमिति भेदमित्यादि वचनं व्या
ख्यातं भवति एकस्वरूपेति ग्रंथस्यायमर्थः ज्ञानानंदैकस्वरूपस्यात्मनः बुद्धिसुखाद्यांतरभेदः संसारहेतुकर्मजन्यशरीरव्यावृत्तिहेतुकः देवादिशरीरभेदे
नष्टे सति नात्मनो भेदः आवरणेहि सः देवादिशरीरभेदस्त्वावरणः तस्मात्तन्नाशे सत्यात्मभेदो नात्मनि विद्यत इत्यर्थः नाहत्यनावरण इति पाठांतरे पूर्वं स्पष्टः
प्रत्यस्तमितेति ग्रंथस्यायमर्थः प्रत्यस्तमितदेवमनुष्यादिभेदं संज्ञामात्रं न तु जन्मादिविकारास्पदं अत एव अगोचरं वचसामित्यादिवचसामगोच
रं तु स्वव्यावृत्त्यर्थमाह स्वसंवेद्यमिति न च स्वरूपतो धर्मतश्च ज्ञानं तच्च प्रत्यक्शब्दाभिलप्यमित्यर्थः संसारदशायां योव्यवहारः तदगोचरं चेत् जानामीत्यपि
तदानीं व्यवहारात् ज्ञानस्वरूपमित्यपि न च कृशकं यदि शक्यं तर्हि देवादिव्यवहारश्च शक्य इत्यत्राह ज्ञानस्वरूपमित्येतावदेवानिर्देश्यमिति तद्देहोपधि
काकार भेदेविध्वस्ते तद्वाचिशब्दागोचरमिति स्वाभाविकरूपवाचिशब्दगोचरमित्यर्थः सर्वप्रकारागोचरं चेद्वचसामप्यगोचरमिति न शक्य
तेवक्तुमिति भावः तच्च सर्वेषामात्मनां समानमित्यनेन पुमानेकोव्यवस्थित इत्येकशब्दो व्याख्यातो भवति तन्मनः समतालं विकार्यं साम्य
हि मुक्तये निर्दोषं हि समं ब्रह्मेत्यादिवचनात् अर्थांतर्यामिस्वरूपमाह एवंविधेति समस्तेत्यादि जीवस्वरूपस्य च देवादिशरीरस्य च प्रत्य
त्वादेवंविधेत्युक्तं यद्वा प्रत्यक्षप्रमाणसिद्धतयोक्तं तस्येत्यादिना जगत्कारणत्वमोक्षप्रदत्वे उक्ते स्वेतरवैलक्षण्यं तृणादेरप्यस्तीति तद्व्यावृत्त्यर्थं शोधकवाक्यो
क्तोभयलिंगत्वेनवैलक्षण्यमुच्यते समस्तेत्यादिना कल्याणशब्द अनंदवाचीसमस्तवस्तुविलक्षणस्वरूपस्य तत्स्वरूपशब्देन विशेष्यांशोभिप्रेतः उपास्यत्व
प्राप्यत्वोपयोगिगुणजाताभिप्रायेण इत्यनया व्याख्यायाः समस्तकल्याणगुणात्मकस्स्वाभाविकादि साधारणशब्दैर्भगवन्नारायणपुरुषोत्तमाद्यसाधा ४

स्वाभाविकरूपवाचि

हानादिता तेनावर्जनीयं भवभयं जन्ममरणादिभयं मिथ्येति मह्त्त्वकृत्वउक्तोषणीयनिवर्तयितुमशक्यमित्यभिप्रायेणावर्जनीयमित्युक्तं तद्विध्वंसना
येति एवं निवर्त्यमुक्तं अत्र जन्यजनकभावोपपादनेन प्रतीतिमात्रसिद्धत्वाभावाद्दृष्टद्वारा निवर्त्यमिति सिद्धं देहातिरिक्तात्मस्वरूपतत्स्वभावेति स
स्वरूपं ज्ञानानंदैकलक्षणं स्वभावो भगवच्छेषत्वं उपासकत्वानुगुणो स्वरूपस्वभावो जीवस्योक्तौ इदं तयोरपि परमात्मस्वरूपस्वभावेति तदंतर्यामि
शब्देन जीवस्य परमात्मपर्यंतत्वेन तद्वाचिशब्दस्य परमात्मपर्यंतत्वं सिद्धं परमात्मस्वरूपमीशितृत्वं स्वभावः एतेन सोऽलभ्यं उपास्यत्वानुगुणौ स्वरूपस्वभावौ
जीवस्योक्तौ एवं सिद्धरूपमुपेयमुक्तं तदुपासनशब्देनोपाय उक्तः स पूर्वं विस्तृत इति नात्र विस्तृतः उपायस्यैव कारणत्वेन ... आदिना ज्ञाप प्राति
नद्वाक्यपनशब्देन वेदांतानुशासनशास्त्रार्थः स्पष्टः वेदांतवाक्यजातशब्देनैकवाक्यमात्रपर्यालोचनं व्यावृत्तं ... इति निर्देशेन
वेदांतवाक्यानामुपासनारूपकार्यप्रधानत्वशंका व्यावृत्ता उक्तार्थविषयाणि ... वाक्यान्याह तत्त्वमसीति बहुधा तान्येव विगोयेत
त्वात् प्रथममुक्तं तत्र जीवविशेषस्य ब्रह्मणा तादात्म्यं प्रतिपन्नमिति जीवमात्रस्य ब्रह्मात्मकत्वपरं वाक्यमाह अयमात्मा ब्रह्मेति अयं ... ९८
श्रुतिमाह य आत्मनीति देवताविशेषनिर्णयार्थमाह एष इति उपासनस्य चरणाश्रमधर्मेतिकर्तव्यताकत्वे प्रमाणमाह तमेतमिति उपासनमेवोपाय इत्यत्र
प्रमाणमाह श्रेयनिर्णयार्थमाह ब्रह्मविदिति ब्रह्मवित् ब्रह्मोपासकः पुरुषः उपायांतरनिषेधमाह तमेवमिति आदिशब्देनोपासनशब्दान्वितवाक्यानि भेद नेऽ
श्रुतयश्च विवक्षिता एषु वाक्येषु जीवपरमात्मनोः स्वरूपं कथं प्रतिपन्नमित्याकांक्षायामुपबृंहणानुगृहीतश्रुतिप्रतिपन्नं तयोः स्वरूपं विवदन् प्रथमं जी
मर वो स्वरूपमाह जीवात्मेति तथात्मा प्रकृतेः संगाद्दुहंमानादिदूषितः भजते प्राकृतान् धर्मान्न्यस्तेभ्योऽपि हि सोऽव्ययः पुमान्न चेश्वरो न पशुर्न चपादपः शरी
राकृतिभेदास्तु भवंते कर्मयोनयः इत्यादिषु प्रकृतिसंगाद्देवादिशरीरसंगाद्यनेकरूपत्वदर्शनान्नरदुर्भयवाक्येकं सर्वदर्शयन्नाह देवमनुष्या

५

प्रकाशे वस्तुनि न संभवतीति ब्रह्मनित्यमुक्तमेवेत्यत्राह नित्योऽनिवस्तुतो नित्यमुक्तस्वप्रकाशमपि जीवैक्यस्य सामानाधिकरण्यवाक्यावगतत्वात्ब्र
ह्मैवात्राविद्यातिरोहितं भेदभ्रममनुभवतीति कल्प्यते अत एव बंधमोक्षोपपन्न इत्यर्थः जीवैक्यं श्रुतिसिद्धमभ्युपगतं चेत्कुतिसिद्धे भेदे शितव्यादि
भेदोऽप्यभ्युपगंतव्य इत्यत्राह निर्विशेषेति अद्वैतवाक्यबलेन तेषां वाक्यानां मिथ्याविषयत्वमाश्रयणीयमित्यर्थः बद्धमुक्तव्यवस्थासिद्ध्यर्थमा
त्मभेदोऽप्यभ्युपगंतव्य इत्यत्राह कश्चिदिति बद्धमुक्तव्यवस्थाश्रुतिसिद्धत्वादंगीकार्या शुकादयो मुक्ता इत्यत्राह इतः पूर्वमिति वामदेवादिभिः सर्वे
शरीराणामात्मवत्वं सिद्धं तथापि सुखदुःखादिव्यवस्थायां चात्मनि भेदेन बंधमोक्षव्यवस्था स्यादित्यत्राह एकमेव शरीरं सजीवं चेतरच्छरीरको
जीवः श्रवणमननादिभिर्लब्धाद्वैतज्ञानः स्यादित्यत्राह नचैकं शरीरं किमिति न व्यवस्थितमिति इदं शरीरं सजीवं तत्तच्छरीरको जीवो ज्ञान
वानिति निश्चेतुमशक्यमित्यर्थः शिष्याचार्यव्यवस्थया चात्मबहुत्वस्यात्मग्राह्यत्वप्रमाणान ब्रह्मव्यतिरिक्तत्वं स्यादित्यत्राह आचार्येद
तिप्रमातृत्वेनाविवक्षितः एकैकमेव निरूपे स्वरूपेण भिन्नज्ञापनाय मिथ्याशक्त्या वृत्तिरिति च लेवतीति वर्णशाद्वेनग्रंथप्रपंचार्थे दोषं चैव वक्ष्यते
अथ द्वितीयश्लोकपूर्वार्धस्य भास्करमतोपन्यासं संग्रहं च विवृणोति अपर इत्यादिना विवरणे प्रवृत्ता इत्यनुवर्तते अपरे व्यवस्थिता इत्यन्वयः प्र
माणसिद्धस्य बाधायोगात्सगुणत्वं तैरभ्युपगतमित्याह अथ स्वतपापमत्वादीति सत्योपहतपापमत्वादियुक्तमपि वेदैकोपदेशान्यथानुपपत्त्या उ
पाधिसंबंधोऽप्यभ्युपगत इत्याह तेनैवेति ऐक्यावबोधेन व्यवस्थिता इत्यन्वयः केनचिद्देवमनुष्याद्युपाधिसंबन्धे तमेनेतयाभेदे सति बंधमो
क्षव्यवस्थाप्युपपद्यत इत्याह बध्यते मुच्यते चेति बध्यते संसरति एवं जीवत्वं ब्रह्मण उक्तं अथ चिद्रूपपरिणाममाह नानाविधेति मल
रूपशब्दो दोषस्वरूपपरः अथ यादवप्रकाशमतसंग्रहं विवृणोति अन्ये पुनरित्यादिना ऐक्यावबोधया यात्म्यं वर्णयंत इत्युपालंभः यथा
विद्वत्त्वेऽणोर्जीवब्रह्मणोस्त्वैक्यमेकरूपं प्रतिपन्नं तथा भेदोऽप्येकरूपः प्रतिपन्न इति अचिद्ब्रह्मणोर्भेदस्य स्वाभाविकत्वं जीवब्रह्मणोर्भेद
स्यौपाधिकत्वं च न वाच्यं उभयत्र भेदः स्वाभाविक इति वर्णयंत इत्यभिप्रायः नन्वाविसगुणत्वांगीकारमाह स्वाभाविकेति अपरे मितत्वं अ
संख्येयत्वं उदार उत्कृष्टः प्रशस्यः नारको गुणसागरो गुणगणानां यस्येति बहुव्रीहिः जीवगतानाचिद्गता शुभास्य दत्वमाह तस्य नेति इति वि स
... इति पर्यालोचने परितनश्लो ५
कं तत्रेत्यादिना द्वितीयश्लोको ...

रणशब्दैश्चैकरूपत्वाभिधीयत इत्याह सर्वात्मेत्यादिना भगवच्छब्देन हेयप्रत्यनीकत्वं च कल्याणगुणाकरत्वं च विवक्षितं नारायणशब्देनोभयविभूतिमत्त्वमु
पात्तम् शब्देनोभयविभूतिभूतचिदचिद्वैलक्षण्यं इत्येतदर्थात्मस्वरूपमित्युक्तं भवतीत्यर्थः अयं यथोक्तः अर्थं चामी श्रुतिविकल्प इति शङ्कायां तदैकार्थ्य २
मुच्यते अस्य चेत्यादिना अस्य भेदश्रुतिप्रतिपन्नस्य वैभवप्रतिपादनपराः श्रुतय इति भेदश्रुत्यानुगुण्याद्भेदकश्रुत्यैकार्थ्यं सामानाधिकरण्यस्य सामर्थ्याद्
भेदश्रुतयोपि तद्वैभवप्रतिपादका इत्यभिप्रायः समानाधिकरणवाक्यस्य तद्वैभवप्रतिपादकत्वं कथमित्यत आह स्वेतरेत्यादिना स्वेतरयोर्भिन्नः परमात्म
नः तदेकनियाम्यत्वेन कृत्स्नस्य शरीरत्वात् वाचिनः शब्दाः शरीरिपर्यन्तमभिदधतीति समानाधिकरणवाक्ये भिन्नप्रवृत्तिनिमित्तपदेस्य यद्यधिकरण ३५
वाक्ये स्वतद्वैभवमेव प्रतिपाद्यमिति सर्वश्रुतीनामैकार्थ्यमित्यर्थः तन्नियमनं प्रतिपादयतीत्यन्वयः परस्य ब्रह्मणः शक्तिलेशेन हि खिलं जगत् विष्णोरंशो
द्विजोत्तम विष्णोरेतद्विभूतयः परस्य ब्रह्मणो रूपं जगत्सर्वं ... शरीरं तत्सर्वं देहरूपस्तु तानि सर्वाणि तद्वपुरित्यादि श्रुतिस्मृतिशास्त्रादिशब्दानां प्रयोगो दृश्यः तत्कृ
त्निदर्शनादिना प्रतिपदं तच्छब्दप्रयोगानुवृत्तिरेकैकस्यानिश्येव हेतुत्वाभिप्रायेण यद्वायं परमात्मानं प्रतिपद्येत तच्छरीरमुच्यते नेमेवशतितदेतस्माच्छ
रीरशब्द इति चोच्यते अतएव पितृत्वपुत्रत्वप्रतिसंबंधभेदादविरोधो द्रष्टव्यः अतः शरीरादिशब्दानामैकार्थ्यपरत्वेनाविरोधे वाच्छशरीरशब्दानुगुण्यं
त्वादिशब्दानां सर्वेषां नीयः अन्तरायमयति तिलक्षणपूर्वकं शरीरशरीरीभावसमुच्चयत्वे अत्वात् कार्यपयोगि विशेषणत्वे ... किं विशिष्टे वृत्ती शा॰
विशेषणतया एकदेशत्वादंशः नियाम्यतया विभूतिः व्याप्यत्वे सति नियाम्यत्वाच्छरीरं अतः सर्वेषामैकार्थ्यमित्यभिप्रायः शरीरतनुशब्दोपादानं कृ
ताभिप्रायेण कृतं शरीरतनुशब्दयोरिव शक्त्यादिशब्दानामविरोधो वर्णनीय इति भावः एवं प्रथमश्लोकार्थं विवृतः अथ द्वितीयश्लोकस्य ...
स्य परपदत्रयो व्याख्यपरस्यार्थक्रमाद्विवरिष्यन् प्रथमं प्राप्तिमतं संग्रहेण विवृणोति तस्यैवेत्यादिना तस्यैवामितिपदद्वयस्यायमभिप्रायः तस्य भेदश्रु
तिसिद्धस्य तत्तच्चिदचिद्वस्तुविलक्षणतया प्रतिपन्नस्य ब्रह्मणः एषां भेदश्रुत्यानुगुण्यात्सामानाधिकरण्यस्य भावाद्भेदकश्रुत्यैकार्थ्यात्तद्वैभव
प्रतिपादनपराणामिति भावः आदिशब्देन तत्रैकश्रुतयो विवक्षिताः भेदनिषेधश्रुतयो वा नेषां विवरणे प्रवृत्ताः केचनेत्यनेन विरोधः स्फोरितः केच
न वर्णयन्तीत्यन्वयः निर्विशेषज्ञानमात्रमेव ब्रह्मेति मात्रशब्देन ह्यचिदंशे जडत्वव्यावृत्तिः कार्त्स्न्येन ज्ञानमित्यर्थः स यथा सैन्धवघन श्रुतितात्पर्यो
भिप्रेतः यद्वा निर्विशेषशब्देन सौत्रनिषेधोभिप्रेतः तेन ज्ञातृज्ञेयरूपविशेषा गुणरूपविशेषाश्च निषिद्धा भवति ज्ञानशब्देन ज्ञानस्वरूपता ज्ञा
तृगुणनिषेधोभिप्रेतः ज्ञानस्वरूपस्यैकरसा ज्ञातृत्वं ज्ञेयत्वं च मिथ्याभितोपि मतं मृतः न ह्यात्वम् ... यस्मात् तत्र ... त्वा युक्ते
/ ज्ञानत्वज्ञेयत्वनिषेधाभिप्रायो मात्रशब्दः एवकारेण ... विशेषत्वप्रतिपादकवाक्यानामतत्त्वावेदकत्वमभिप्रेत ... यथा ... न पूर्वकोबंधः तु

किमेकं ज्ञानं ज्ञात्वा न द्वयं एकत्वपक्षे किमेकविज्ञानेन सर्वविज्ञानं सर्वस्याभावादुच्यते उतैकस्य सर्वस्य ज्ञानादन्यथा इति विकल्प्य प्रसिद्धेन्य प्रथमं दूषयति यदेति
एकत्वादिपक्षे नेत्यतीति सर्वेशब्दस्य सर्वाभाववाचित्वाभावादिति भावः द्वितीयं दूषयति सत्यमिथ्यात्वयोरेकत्वप्रसक्तिर्वेति जगतः सत्यत्वं ब्रह्म
णो वा मिथ्यात्वमित्यर्थः द्वित्वपक्षे च एकविज्ञानेन सर्वविज्ञानं स्यात् पुला कन्याथे सर्वस्यैकसाधर्म्याद्धि स्यात् तत्र मतेन युक्तं कार्यस्यासता
त एकवेधर्म्याद्यदि स्यात् देवदत्तप्राधान्यज्ञाने नेतरेषामप्रधानतया ज्ञानत्ववत् तदानीं खल्वनेन मिथ्यात्वेनेत्यध्याहारः स्यात् ज्ञातव्याभावे न नि
वृत्तिलक्षणवाक्यात् ज्ञानद्वयं वैरूप्यात् स्वारस्यं चेत्यभिप्रायः अपि त्विति न हि द्वयोरपरयोः सत्यत्वेपि चरज्ञाने नपतोज्ञातो भवति तदाहेत्यर्थः माद्र स
र्वस्य नाशात्वेनैव सत्यत्वस्यार्थः न हि कारणावस्थे ब्रह्मणि ज्ञाने कार्यावस्थाज्ञानाम भवतीति चेन्न उच्यते न हि विशेषणं तद्विशिष्टाकारेण विशेषणं तदा न्व
यः अपि तु कस्मिन् धर्मिणि विशेषणद्वयान्वयो विवक्षितः तस्मान्न विज्ञानत्वविशिष्टाकारेण सर्वत्वं सर्वत्वविशिष्टाकारेण ज्ञातता वा किंतु सर्वत्वं ज्ञानत्वं चे
का ऽस्य वृत्तिलक्षवस्थानवगामे पिधर्मिणेकेनैव ज्ञाततया प्रयोगो मुख्य एव दृष्टः सोयं देवदत्तः पूर्वमेवायं मया ज्ञात इत्यादिषु न हि तत्र वर्तमानकालविशि
ष्टत्वेन पूर्वं ज्ञातः तस्मात् द्विषदूरीनेनामी युरूषा दृष्टाइति वदिदमप्युपपन्नमेकस्य सत्यत्वज्ञानेन मतिरिक्तं मिथ्यात्वेन ज्ञातं भवतीति चेत् न येना
श्रुतं श्रुतं भवतीत्यादिषु वाक्येषु मिथ्यात्वेनेत्यध्याहारः एकविज्ञानस्य सर्वविज्ञानस्य चैकरूप्यं मुख्यत्वं च ज्ञानमावात् न हि सर्वं मिथ्यात्वेन ज्ञातं
न कश्चित् ज्ञानाहितं सत्स्य सर्वविज्ञानशब्देन सर्वज्ञानं निवृत्तिलक्षणम् स्यादिति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा वाक्यं किंतु ज्ञात्येनैव सत्यत्वं
कथयतीति तथा सति कथं प्रतिज्ञोपपत्तिः उपक्रमवाक्यं सत्यपक्षानुगुणमपि तदुपसंहारापेक्षया प्रबलं ननु महावाक्यसारस्यापेक्षया महावाक्ये चमि
थ्यात्वपक्षानुगुणं तत्वमसि प्रमितिकेवलसत्यं यदेवैकमेवेत्यादिषु तथा प्रतीतिरिति शंकायामाह अथ यथेति प्रतिज्ञावाक्योपक्रममनंतत्वमसीति
वाक्यसारस्य व्याख्यातुं स्त्रोसीति श्रूयमाणमध्यमपुरुषस्यार्थमाह सेतकेतु प्रत्याहेति तत्त्वमसीत्यादि श्रुतिवाक्यो पादानं तत्र वाक्ये तत्त्वमसी
त्यस्यार्थमाह परिपूर्ण इव लक्ष्यत इति पृच्छतिधातुर्द्विकर्मकः वक्तृकर्मको वा च्यकर्मकश्चेति तत्रादेशशब्दाभिहितं वाच्यकर्मेति दर्शयितुं ताना चा
र्यानिति वक्तृकर्मव्याहृतं नवैनूनं भगवंत इत्यादेरर्थं विवृणुयात् एतद्वेदिष्यन् कथं मे नावक्ष्यन्निति तदुक्तं निर्दिष्टं छात्राचार्यत्रयस्मारिताः तानिति वक्तृ
र्यानिति वक्तृकर्म ... रिज्ञायामिप्रायः कर्मादिश्यात यां तरस मुच्चयो वा
वचनेन ततमादेशमिति नष्टेपाचार्याविषयत्व शंकानुदासः तमपीति श्रोतुरुलंभत्व मित्यपिशब्दाभिप्रायः कर्मादिश्यात यां तरसमुच्चयो वा
मिश्रतः इति सेतकेतुः प्रत्याय ... नैनत्योदेशाइति प्रश्नस्यार्थं व्याख्यन् तथ्यादेशः
प्रशासनेन ज्ञाकर्तारश्चकारके सन्नायामिति चेत्क ... कनं ताद्रुमं देशाकर्मीत्पाद्यतेस्य

6

चर्नुअभेदभेदहृदकासमाधिकरणश्रुतितत्त्वोवोपर्यालोचनपरानेलेकवाक्यमात्रवृत्तास्त्यर्थः उदाहृतं निमग्नवत्यामुना चार्थे इति शेषः तत्र प्रथमं तत्त्वम
सीतिवाक्यस्य निर्विशेषपरत्वे अनेकदूषणानि वक्तुं न पूर्वं तच्छब्दावगतगुणजातमाह प्रकृतमायादिना प्रकृतपरामर्शीति पदं हेतुगर्भं तच्छब्दो गुणविशिष्ट
वाचीप्रकृतपरामर्शित्वादित्यर्थः कथं गुणानां प्रकृतत्वमित्यत आह सत्संकल्पेति आदिशब्देनानुप्रवेशनामरूपव्याकरणयोर्ग्रहणं ते अनुदयविभववेल
यादृश एव तत्तद्वाक्यप्रतिपन्नतया विशेष्यं तेन तदेवेत्यादिभिः पदैः प्रतिपादिता इत्यनेन तत्स्वरूपाधीना गुणा उक्ताः सर्वशाखाप्रत्ययन्यायेन प्रकरणान्तराधीना।
नू कुस्मात् गुणानाह तासंबंधितयेति कारणवस्तुसंबंधितया प्रकरणान्तरोक्ता गुणसम्पन्ने सर्वज्ञेनेत्यादिना यः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते स ईश्व
रो जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय न तत्समश्चाभ्यधिकश्च दृश्यते सत्यकामः सत्यसंकल्पः तस्य भासा सर्वमिदं विभातीत्यादिके एषा सर्वं ततादि
गुणदृष्ट्याः एकैकमनवधिकातिशयाः कल्याणगुणगणाः असंख्येयाः इत्याह अनवधिकेति हेयप्रत्यनीकत्वमाह अपहतपाप्मेति निरस्तनीगुणस्य
वैसृष्ट्युपयोगित्वेन प्रकरणान्तरोक्ता अचूष्टः भवन्तीत्यभ्यधिकनिवृत्तोपलम्भात्तदेककारणत्वसिद्धिः सर्वावभासकत्वं च सृष्टजगत्स्थित्युपयोगित्वेन का
पक्षमो॥ रणत्वमपेक्षितं हेयप्रत्यनीकत्वं च समाश्रयणीयत्वोपयोगि हेयास्पदत्वे कर्मवश्यत्वे च स्यातं आद्येन प्रसंगात् तत्तेजैव तच्छब्दावगतानां विहन्यन्त इत्यर्थः अथ यस्मादित्यादि
१ उपक्रमशब्देनापक्रमौ विवक्षितः तत्त्वमसीति वाक्यापेक्षयात्र इदं सेतिवाक्यस्योपक्रमत्वे येनैकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं तस्याप्युपक्रमभूतमि
त्याभिप्रायः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञामुखेन कारणस्यैव सत्यत्वप्रतिज्ञायेति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः कारणस्यैव सत्यत्वे फलि
ताभिमर्थः कारणस्यैव सत्यत्वं दृष्टान्तकार्यकं चोक्तमित्याह तत्रेति दार्ष्टान्तिकवाक्ये पि निर्विशेषत्वमुक्तमित्याह सत्यभूतस्येति निखिलभेदशब्देन स
गतभेदोपि विवक्षितः विसजातीयभेदानन्तर्गतत्वात्स्वगतभेदस्य शोधकवाक्यानामपि निर्विशेषपरत्वमाह एतदिति एतच्छोधकानि कारणवाक्यावगतशो
धकत्वं तद्वैकार्थ्येन निर्विशेषपराणीत्यर्थः सामानाधिकरण्यस्याभावान्निर्गुणमित्यादिशोधकवाक्यानामैकार्थ्याच्च सत्यं ज्ञानं विज्ञानमानन्दमित्यादी
निशोधकवाक्यानि निर्विशेषपराणीत्यभिप्रायेणाह सत्यं ज्ञानमिति [illegible] सत्यादिपदानां निर्विशेषपरत्वे प्रवृत्तिनिमि
तमेदाभावात् सामानाधिकरण्यलक्षणहानिरित्यत आह सर्वविशेषप्रत्यनीकेति प्रतियोगिविशेषाः प्रवृत्तिनिमित्तानीत्यर्थः नहि तद्व्यावृत्तिरूपो धर्मः।
स्पादित्यत आह एकाकारतामिति आकारशब्दः स्वरूपवाची स्वरूपमेव व्यावृत्तिरिति भावः निर्विशेषवस्तुपरत्वे पदानां पर्यायत्वं स्यादिति पर्याय
त्वशंकां परिहरति नचेति कुत इत्यत आह एकत्वेति
विज्ञानमाह नेवदेवमिति एकविज्ञानेन सर्वविज्ञानं च

स्तुशरीरशब्देनब्रह्मणोहेयास्पदत्वप्रसंगःपरिहृतः। निर्वेदादुपसन्नायवक्तव्यमर्थंस्वयमेवकथंवदतीत्यत्राह पुत्रंप्रतिपृष्टवान्पितेतिपुत्रअतिरिक्तानांशुश्रूषाद्य
पेक्षापुत्रस्यपुत्रत्वमेवब्रह्मोपदेशेहेतुरितिशास्त्रार्थःसूचितःपुत्रपितृशब्देनोद्दालकोहारुणिश्वेतकेतुंपुत्रमुवाचतंहपितोवाचेतिश्रुतिवाक्यंस्मारितं अनेन
नरवाक्यमिदंकथंनुभगवःसआदेशइति इदंकिंप्रश्नरूपं उतचोद्यरूपमितिशंकायांचोद्यरूपमित्याचष्टेतदेतदित्यादिनाप्रतिवचनप्रकारेणास्यार्थंज्ञाय
तेप्रतिवचनेयथासोम्यैकेनइत्यादिनादृष्टांतोपादानादिदंचोद्यरूपमित्यभिप्रायः। परिचोदयतीतिविवक्षितविशेषकथनमकुर्वन्सामान्येनचोदयतीत्यर्थः। वा
क्यमुपादत्ते कथंविति प्रथपिताब्रह्मणोजगत्कारणज्ञानेनकार्यविज्ञानंलोकसिद्धंदर्शयतीत्याह यदिचोदितःपुनरित्यादिना ज्ञानानंदामलत्वैकस्वरूपमि
तिविज्ञानमानंदंब्रह्मेत्यादिशोधकवाक्यार्थोविवक्षितः। स्वरूपशब्दोधर्मिस्वरूपनिरूपकधर्मवाचि अग्रयदिष्टेष्टमाहात्म्यमित्यनेनानंतशब्दार्थोविवक्षितः
स्वरूपमपरिच्छिन्नमित्यर्थः। गुणतोप्यानंत्यमाह सत्यसंकल्पत्वमिश्रैरिति सत्यशब्दस्यार्थमाह अविकारस्वरूपमिति अत्रस्वरूपशब्दोविशेष्यांशपरः स्वम
विकारत्वादिश्रुतेर्विषयोदर्शितः उपादानत्वादिप्रयुक्तविकारादिविषयंदर्शयति नामरूपेतिपूर्वंसूक्ष्मचिदचिद्वस्तुशरीरमित्येतावदुक्तं अत्रनामरूपवि
भागानर्हशब्देनसूक्ष्मशब्दोव्याख्यातः अनेनउपादानत्वयुक्तंचोद्यंपरिहृतं अथनिमित्तत्वप्रयुक्तंचोद्यंपरिहरति स्वलीलायाइति अवाप्तसमस्तकामस्यापिली
लार्थंजगद्व्यापारउपपद्यतइत्यर्थः। सहायासरूपजगदाधारस्यनलीलात्वमितिचेत्तत्राह स्वसंकल्पेनेति संकल्पमात्रसाध्यत्वान्नायमायासइत्यर्थः। स्वां
शेनविशिष्टस्यस्वस्यांशेनब्रुवन्लोकदृष्टकार्यकारणयोरनन्यत्वंदर्शयितुंदृष्टांतमाहेतिकार्यकारणयोरनन्यत्वेदृष्टांतमाहेत्यर्थः। अन्यत्वनिबंधनचोद्य
स्यानन्यत्वज्ञापनेनपरिहारइतिभावः। दृष्टांतवाक्यमुपादत्ते यथासोम्यैकेनमृत्पिंडेनेतितत्रकारणज्ञानेनकार्यविज्ञानस्यासिद्धेर्यथावदुपपादकमुत्तरखंडं
प्रथमंव्याचष्टे एकमेवेति तत्रवाचेतिपदंव्याचष्टेनानाव्यवहारास्पदत्वायेतिवाक्छब्दोत्रलक्षणयावाक्पूर्वकव्यवहारेवर्ततेवाचाव्यवहारेव्यवहा
रस्यप्रयोजनतयाहेतुरित्यर्थः। विकारशब्दार्थमाहवदेशतइत्यादिनासंस्थानमेवावस्थासैवविकारःषोडशकस्याविकारइत्यादिषुविकारशब्द
स्यावस्थावद्द्रव्यपरत्वेनप्रयोगदर्शनात्तद्व्यावृत्त्यर्थमवस्थारूपविकारइत्युक्तं नामधेयपदंव्याचष्टेनानानामधेयमितिमृत्तिकेतिपदं
व्याचष्टे मृत्तिकासंस्थानविशेषत्वादित्यादिना [illegible] एवंकारणज्ञानेनकार्यज्ञानस्योपपादकमुत्तरखंडं आयत
दुपपादयत्पूर्वखंडंव्याचष्टे यथेति लोकेकारणज्ञानात्कार्यज्ञानंसंभवतु तथाप्येकविज्ञानेनसर्वविज्ञानंनोपपद्यतेविजातीयकार्याणामेक

क

प्रकृत्यर्थ उपदेशः प्रत्ययार्थः कर्म चेति परैर्व्याख्यातं तत्र प्रकृत्यर्थात् सारस्यं प्रत्ययार्थात् सारस्यं अस्मिन्नित्यत्र प्रकृत्यर्थात् सारस्यं प्रत्ययार्थात् सारस्यं कर्तृ अतिरिक्तकारकवि
षयस्य तु अकर्तृत्वं तृतीयार्थत्वं विवक्षातः कारकाणि भवन्तीति न्यायेन कर्तुरेव कारणान्तरनिरपेक्षत्वलक्षणेन कारणेन साधर्म्यरूपेण साधकतमत्वेन करणत्वविवक्षया तृ
तीयाप्रत्यय उपपद्यते एतदभिप्रायेण आदिश्यते नेनेत्युक्तं न त्वादिश्यतीति विवक्षया कारकप्रवृत्तिः स्वतन्त्रः कर्ता तरतरीति विधानस्य किं प्रयोजनं ततः प्राप्तत्वे कर्तृत्वा
तिरिक्तकारकस्य कर्त्रादिकरणत्वविवक्षया तृतीया चः कर्त्रर्थत्वमसारस्यमिति विभागः प्रयोजनं सूत्रस्य प्रयोजनवत्त्वेऽपि सारस्यमसारस्यं चतुर्थं चेति भेदेन प्रयो
जनान्तरेणापि चेत्तदुच्यते परमेष्ठिप्रत्ययार्थे सैव सारस्यं अस्मात्पदत्तु सारस्य द्वयमस्ति अर्थसारस्यं शब्दसारस्यं चेति प्रकृत्यर्थसारस्यं च भावसिद्धं विवादाद्भिन्नानि
ष्टस्य साधारणाकाराभिधानं चक्षुः प्राप्तं सर्वप्रकाशितत्वं द्रष्टा साधारणधर्म उपदेशस्तत्तु कर्मस्वरूपादेः साधारणं किंवा अपेक्षितं विधेयं न पेक्षितं विधा
दुर्बलमेतिन्यायादत्रावश्यापेक्षितं प्रशासितृत्वं ज्ञापनमेव युक्तं नान्यपेक्षितमुपदेशस्य ज्ञापनं तस्याद्वितीयस्य सारस्यमर्थसारस्यं चेति सारस्यद्वयमभ्यवस्य
वार्थः तु तदन्तः कृत्स्नप्रशासितृत्वे सिद्धे हि तदसाधारणाकारतया वक्तव्यं तत्र किं प्रमाणमित्यत आह एतस्य वा इति स्मृतिमाह प्रशासितारमिति नकेवलं
श्रुत्यन्तरे स्वव्यप्रशासितृत्वसिद्धिः अस्मिन्प्रकरणेऽपि सिद्धमित्याह अपि चापीति अपि शब्दात् द्विरेकत्वं नत्वप्रशासितृत्वमिति तत्फलेनमित्यर्थः एवमादेश श
ब्दार्थ उक्तः अथ तच्छब्दं च विवृण्वन्वाक्यार्थं योजयति अश्रुतं इति येन विज्ञाते भवतीति एतत्तु नासीत्यन्वयः येन श्रुतेन मतेन चिन्तितेनेत्यधाहारेण योज
नायाः को हेतुः नहि अस्य एतत्तया कृत्स्नस्य ज्ञानं भवति अपितु तज्ज्ञानेन निवर्तुसामर्थ्यात् किंचात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातमस्मात्कथं नानुमान
योविज्ञाते सर्वमिदं विज्ञातं भवतीत्यादि श्रुत्या च एवं दृष्टान्तमामर्थ्यात् तु दृष्टीति किं सामर्थ्यं श्रुत्यन्तरके दोषस्यायं चैवं व्याख्यातं इत्युक्तं स्यादिति केदान्ताचाभिप्रेततया पाप
मेवास्याः श्रुतेरर्थ इत्यभिप्रायः ननु तस्मिन्नावाक्ये उपादानत्वं नकेवोक्तं किंतु फलितं कारणत्वं तावता तत्वं च न केवोक्तं अथ जगत्कारणत्वाद्यभिप्रायस्य किं प्रयोजनमित्यपेक्षायां पा
माह निखिलजगदेकेति श्रुत्यन्तरेषु यतो वा इमानीत्यादिवाक्येषु जगत्कारणत्वलक्षणं केवलमुक्तं नत्वं तस्माद्व्रज जगत्कारणत्वगर्भं विदतः किंतु स्वयाकिं उपश्रुतमित
मिप्रायइत्यर्थः अप्राप्यइति प्रश्नोक्तिस्तदुक्तिपूर्वकं कस्मरणमभिप्रायेणात्याशयवानाह त्वयाश्रुतमितीतिनावद्बुद्ध्येति किं दोक्तं तस्माज्जगत्कारणत्वं तन्मोचेप्रयोजनं
ब्रह्मस्वरूपप्रश्नः कृतो भवति सर्वज्ञत्वादिगुणाः कारणत्वोपयोगितयोक्ताः पूर्णपूर्णस्यैव लीलाऽन्यतः सत्यकामत्वस्य कारणत्वोपयोगः हार्दो भावः हृदि निहि
तं तद्वाक्यमित्यर्थः कारणत्वे सत्यप्येकविज्ञानेनोपपद्यते कारणात्कार्यस्य इष्यमानत्वात् कारणत्वं च नोपपद्यते तया सति ब्रह्मणो हेयास्पदत्वप्रसंगात् कारण
त्वोपपत्तावप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते नानाजातीयकार्याणां नानाजातीयकारणत्वदर्शनादित्यत्राह तस्मै तस्य निखिलकारणतया कार्यभूत
मखिलं जगद्विज्ञानं भवतीत्यन्वयः कारणात्मना ... नानात्वं ... विशेषसंस्थितेसंस्थानविशेषविशिष्टमित्यर्थः तत्र चिद्

तस्मात् स्यामिति पूर्वमुक्तं स्वयमेवोदाहृतं तदेवं संकल्पोऽस्यार्थः स्वांशः प्रकृतिः तेजोऽबन्नसृष्टिवचनं वियदादेरप्युपदर्शनार्थमिति वियदादिकरणसिद्धार्थाभिप्रा
येणाह वियदीति भाष्ये महदादेरप्युपदर्शनार्थमित्युक्तं पुनरपीति व्यष्टिसृष्ट्यर्थमित्यर्थः सेयं देवतेति सदेवेत्यादौ निर्विशेषं वस्तूक्तं सेयं देवतेति सगुणमुच्यत इति भ्र
मापनयनार्थमेवमुक्तं उत तत्तेजः परस्यां देवतायामिति हि वक्ष्यते तत्प्रत्यभिज्ञानाय यदादेवेत्युक्तं अत्र पूर्वापरेषु सगुणं ब्रह्मोच्यत इत्यर्थः व्यष्टिसंकल्प
वाक्यमुपादत्ते हंताहमिति अनुप्रविश्य नामरूपे व्याकरणानि अनुप्रवेशश्रवणेन मानयति त कुलालादिनिर्वृत्तिर्देवदत्तघटादिनामरूपव्याकरणेनो व्या
वृत्तत्वावगमात् बहु स्यामिति उपक्रम एवास्य पर्यन्त नामरूपभाक्त्वसंकल्पात् तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेति नामरूपयोर्ब्रह्मपर्यं
तत्वश्रवणात्तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रवणात् व्यष्टिसृष्टिसंकल्पवाक्ये अनुप्रवेशपूर्वकनामरूपव्याकरणोक्तेः तद्धेदं तर्ह्युपलक्षणार्थं मह
दहंकारादिनामरूपयोर्ब्रह्मपर्यन्तत्वात् यस्य बुद्धिः शरीरं यस्याहंकारः शरीरं यस्याहंकारः शरीरमिति हि श्रूयते अत एव प्रकृतिं पुरुषं चैव प्रविश्यात्मे
च्छया हरिः क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययाविति स्मृतेः एवं व्यष्टिसमष्टिसंकल्पवाक्यो[illegible]नामरूपव्याकरणयोर्ब्रह्मपर्यन्तत्वं च विवक्षितम्
अस्य सृष्टिसंकल्पवाक्यानुरोधात्तद्धैक्षतेति श्रुतेरनुगुणान्तदनुप्रविश्य सच्च त्यच्चाभवदित्यनुप्रवेशपूर्वकब्रह्मपर्यन्तनामरूपव्याकरणोक्ते
र्दोषो नावगम्यते बहु स्यामित्युक्तं नानानामरूपभाक्त्वं मृत्तिरुपस्य घटादिनामरूपभाक्त्ववत् किं सद्वारकं जीवस्य देवादिनामरूपभाक्त्ववत् किं सद्वार
कमिति संशयेऽनेन जीवेनेत्यादिश्रुतिः सद्वारकमाह ब्रह्मणि समष्टिनामरूपभाक्त्वं सद्वारकं न हिरण्यगर्भादेर्जीवं प्रति शरीरत्वाभावात् व्यष्टिनामरू
पभाक्त्वं सद्वारकं सद्वारकं च तथा सति तद्विपर्यावसानहेतुतानो शब्दादिवत् अनेन जीवेनात्मनाजीवशरीरकेण मयात्मसिंचेन भूत्वा बहवो मया इत्ता
इति वत् तदनुप्रविश्य सच्च त्यच्चाभवदिति जीवेऽनुप्रवेशेन तन्नामभाक्त्वश्रवणात् जीवेनात्मनेति तृतीयायाः कोऽर्थः न तावत्सहयोगलक्षणा
येतरीया कारकविभक्तौ संभवन्त्यामुपपदविभक्तेरन्याय्यत्वादिति न्यायेनोपपदविभक्तेरनुपपत्तेः न च करणे तृतीया अनुप्रवेशं प्रति जीव
स्य करणत्वाभावात् अनुप्रवेशस्य द्वारकत्वाद्विशेषः जीवशरीरस्य परमात्मपर्यन्तत्वाच्चानेयं करणे तृतीया न स्यात् कर्तरि तृतीयेति द्वाह न
ताद्धितसमासैरनभिहितं तद्धि कारकं [illegible] यः कर्तरि प्रथमैव युक्तेति चेत् न

कारणकल्पायोगादित्यितु स्वाज्ञस्यैवकार्यकारणत्वाज्ञानेनयुक्तः पृच्छतीत्याह ततइत्यादिना विजातीयानामपि सर्वकार्याणां तस्यैवोपादानत्वं देवनिमित्तमित्यु
पदिदेशेत्याह ततः सर्वज्ञमिति उपदिशन्नेव एवेद्वं सदेवेतिवाक्योपादानं इदमिति जगन्निर्दिष्टमिति निःकारणमूलब्रह्मानन्यत्वेनज्ञातो नित्यत्वाभिन्नयो प्रकृ
तमस्ति चेत्तत्परत्वेऽस्य प्रत्यक्षादिप्रमाणसिद्धं जगत्परत्वमेवेदंशब्दस्योचितमिति भावः अग्र इत्यादि अनंतरसृष्टेः पूर्वं प्रमाणत्वादग्रशब्दस्य प्रलयकालपरत्वम
वगम्यत इति भावः तस्मिन्काले जगतः सदात्मकत्वांसदेवेति प्रतिपादनिर्देशेनावैशेषिकोक्तं कदाचित्सत्वं कदाचिदसत्वं च व्यावृत्तं तेन प्रलयकालेऽपि सत्वं फ
लितमित्येवमुक्तं ननु वाचनिकोऽयमर्थः सदेवेदमग्र एकमेवासीदिति सान्वयः सकृत्प्रमाणसंबंधाहेतोपाधिनाप्रकृतिपुरुषकालविशिष्टं तस्माह कारणात्
कार्यस्यानन्यत्वेन कदाचिज्जगतः सत्वं चप्रदर्शितं कारणभूतब्रह्मानन्यत्वेनज्ञातो नित्यत्वमित्यर्थः ननु तर्हि कालेऽपीति जगत्सदेव चेत् प्रलये कोविशेष इत्यपेक्षा
यां इदंमिति नामैव तस्यविभक्तनामरूपावस्थाप्रलयः विभक्तनामरूपावस्था कार्यत्वेनेति वेदमेकमेवेति पदेनोक्तं भवतीत्यर्थः अनेन ब्रह्मण उपादानत्वं
फलितमित्याह ततप्रतिपादनेनैवेति भावावस्थाविशेषवतः प्राप्तचण्डावस्थागोत्रनुपादानत्वं तस्मादवस्थामात्रवत्त्वात्स्याः पूर्वावस्थास्यत्वेनोपादानत
मुक्तं भवतीत्यर्थः कृत्स्नकार्यस्यैव निमित्तत्वेन निमित्तान्तरशंकामद्वितीयपदंव्यावर्तयतीत्याह स्वव्यतिरिक्तेति कुलालस्य विविधपरिणामशक्तेः कल्पेन
नोपादानत्वं मृत्पिंडस्य ज्ञातृत्वविरहादनिमित्तत्वं अतन्नूभयसङ्गावात्तस्यैवोभयकारणमित्यर्थः उक्तार्थस्यापक्रमसंगततमाह तमादेशमिति आदेशशब्देन
प्रशासितृत्वं कंठोक्तं येनाश्रुतं श्रुतमित्यादिप्रतिज्ञानेन उपादानत्वमभिप्रेतं तदुभयमत्रसूचमित्यर्थः अत्रास्य कार्यवादोपन्यासोनिरासवाक्ये द्वितीयपदोज्जनायां
व्याख्यास्यत इति नात्रोदाहृतं अग्र इत्यनंतरवाक्यपूरकसयदानैत्स्वहेत्पादनेत्स्वयमेवेति सदेवेतिवाक्यं सजातीयविजातीयस्वगतभेदनिषेधपरत्वेन परैर्व्याख्यातं
तदुत्तरवाक्यावनुगुणं अस्य तु कार्यस्यैव उपपादकान्युत्तरवाक्यानीत्यभिप्रायेण जगदुपादानं जगन्निमित्तं सदिति विशेषणद्वयोपादानोपपत्तिं स्वाचष्टे तदै
क्षत इत्यादिना वक्ष्यमाणस्य सत्त्वुपपादकविशेषणानाह सर्वज्ञमित्यादिना अवाप्तसमस्तकामस्य प्रवृत्त्यनुपपत्तिं परिहरति अवाप्तसमस्तकामस्यापि लीलार्थमि
ति संकल्पमात्रसाध्यत्वात् जगज्जगद्व्यापारस्यायासरूपत्वमपि प्रायेण संकल्पमित्युक्तं अजायमानो बहुधा विजायत इमुक्ता वचनारूपचतुर्वर्गस्त्वं जगत्
येणोक्तं तत्र बहुशब्दार्थस्तीति दर्शयितुं विविच्यानेनेत्याह उक्तं च बहु स्यां प्रजायेयेति जायते स्तीत्याद्यवस्था सु जायमानावस्था जातावस्था चेत्युक्तत्वात् च
वस्थाद्वयमस्तिनत्राहितशब्दवाच्योत्यन्तावस्था उत्पाद्यमानावस्था जायत इति शब्दवाच्यानत्र बहुस्यामिति वाक्ये स्यामिति पदेनोक्तत्वात् विवृत्तितस्सूर्वे
भावित्युत्पाद्यमानावस्थान दर्शं प्रजायेयेत्युक्ता तिरिमाणां साधनस्य पूर्वभावित्वं साधनस्य पश्चाद्भावित्वं संकल्पेन साध्यं पूर्वभावि साधनं पश्चाद्भावि

९ त्यभिधेयानां घटस्याभिधेयानां डित्थादीनां च परमात्मनि सद्वारकान्वयोऽभवतीत्यर्थः । अत एव कार्यान्वितानयोऽभिभवतीत्यादिरूपपद्यते इत्येतदुक्तं
भवतीत्यन्वयः । अथ त्रिवृत्करणादिवाक्यानां प्रस्तुतार्थानपेक्षत्वेन तानि विहायापेक्षितवाक्यानामर्थं संगृह्णाति एवमित्यादिना नाम
रूपव्याकरणार्थं हि त्रिवृत्करणं तस्मात्त्रिवृत्करणसाध्यनामरूपव्याकरणसंकल्पवाक्ये पूर्वभाव्यभूत् उत्पत्तिवाक्योक्तत्रिवृत्करणस्य पूर्वभा
वित्वं युक्तं पाठक्रमेण त्रिवृत्करणस्य पश्चाद्भावित्वे प्राप्तेऽर्थक्रमेण पाठक्रमस्य बाधनात्त्रिवृत्करणं पूर्वभावि स्यात् अग्निहोत्रं जुहोति य
वागूं पचतीत्यत्र यवाग्वाः पूर्वभावित्वं पाठक्रमबाधेनांगीक्रियते यवाग्वा जुहोतीति यवाग्वा होमसाधनत्वाविहितत्वात् तद्वद
त्रापि क्रमोऽनुसंधेयः सन्मूलाः सोम्येमाः प्रजा इत्यादिवाक्यस्यार्थमाह एवमिति सदुपादानताः सन्निमित्ततास्सदाधारेण सन्मूला इत्यत्र मूलशब्दा
र्थ उक्तः सदायतना इत्यत्र शब्दार्थमाह सदाधारा इति नियंतृतया धारकत्वाद्धारकत्वात्कृत्स्नमर्थमाह सन्नियाम्येति अनेन शेषत्वमप्यर्थ
सिद्धं शरीरतया शरीरत्वं हि शेषत्वं धार्यत्वं नियाम्यत्वं च तद्व्याप्तत्वं तच्छेषत्वादीति आदिशब्देनानुक्तमविरुद्धमन्यच्च ग्राह्यमिति ता
यदन्यदपेक्षितं गृह्यते कार्यकारणभावादिमुखेनेत्यादिशब्देन सदाधारकत्वादिकं विवक्षितं तेन ब्रह्मात्मकत्वमेव सत्यमिति प्रति
पाद्येति धारकत्वादिभिस्तावद्भूरीतात्मभावसिद्धः कार्यकारणभावाच्च सिध्यति स्वरूपमात्रस्य कारणत्वायोगेन विशिष्टस्यैव कार
णत्वात् ब्रह्मात्मकत्वमेवेत्येवकारेण स्वपर्येतत्वं प्रामाणिकमित्युक्तं भवति ऐतदात्म्यमैतदात्मकं स्वार्थे ष्यञ् संबंधार्थे वा एतदात्मसं
बंधीत्यर्थः अस्यात्मनः शरीरतया संबंधीत्युक्तं भवति ऐतदात्म्यमिदं सर्वं स आत्मेति निर्देशो रामानुजं लक्ष्मणपूर्वजं चेतिवन्मते
वः आत्मशब्देन फलितमर्थमाह कृत्स्नं जगत् ब्रह्मशरीरमिति अस्य यत्पितेत्युक्ते पितृत्वप्रतियोगिनः पुत्रत्वं स्वार्थसिद्धं भवतीत
स्मादित्यादिरैतदात्म्यमिति सामानाधिकरण्येन प्रतिज्ञातं ब्रह्मात्मकत्वं तत्त्वमसीति सामानाधिकरण्येन जीवविशे
ष उपसंहरतीत्यर्थः अनेन देहे स्वरूपमात्रे यदि भागानिमित्तं चोपसंहृतं भवति उद्देश्यरूपमात्रे याविभागमतित्वे शब्दउद्देश्य

स्य समर्थको न भवति तच्छब्दावबद्धकारणत्वस्य ब्रह्मणोऽनुसंधानात् त्वंशब्दस्तु लोकव्यवहारप्रकारेण देहसंघातसमर्पकः ९

न व्याकरणकर्तात्र हि निर्दिष्टमिति तः अनुप्रवेशकर्तानुनभिहित इति तृतीयाभिधेयः नामरूपव्याकरणानुप्रवेशक्रिययोः समानकर्तृकत्वमनुप्रविश्येति क्त्वा
प्रत्ययेनाभिहितमिति न तृतीयाभिधेयः कर्ताभिहितः क्त्वाभिधेयः अपि तु प्रत्ययान्तराभिधेयः प्रत्ययान्तरं च तिङ्प्रत्ययः कर्तुरैक्यमेव क्त्वाप्रत्ययाभिधेयं यथा स
मानाधिकरणेषु वाक्येषु प्रातिपदिकार्थगते विशिष्टार्थे विशेषैक्यमात्रं समानविभक्त्यभिधेयं न तु विशेषणान्वयो विशेष्ये च एवमत्रापि क्त्वाप्रत्ययो न क
र्त्रभिधायी अपि तु प्रत्ययान्तरप्रतिपन्नक्रियाद्वयकर्त्रैक्यमात्राभिधायी क्त्वाप्रत्यय एव कर्त्रभिधायीति चेत् व्याकरवाणीति तिङ्प्रत्ययो निरर्थकः स्यात् तस्मात् क्
त्यान्तरप्रतिपन्नक्रियाद्वयकर्त्रैक्यमात्राभिधायी क्त्वाप्रत्ययः अनुप्रवेशक्रियाकर्ता तृतीयाभिधेयः एवं च कर्तरि कृदिति कृत्प्रत्ययानां कर्तरि विहितत्वात् कृत्संज्ञकः
क्त्वाप्रत्ययः कर्त्रर्थे विधीयत इति चेन्न अर्थान्तरेष्वविहितानामेव कृत्प्रत्ययानां कर्त्रर्थत्वं न त्वर्थान्तरेषु विहितानां तव्यादीनां कर्माद्यर्थे विहितत्वात् अयं तु क्त्वाप्रत्ययो
भावे विहितः तथाधिकारात् प्रातिपदिकार्थमात्रे यथा प्रथमाविभक्तिः तथा धात्वर्थमात्रे विहितोयं प्रत्ययः स्वभावार्थः अयं तु क्त्वाप्रत्ययो भावे विहित इति न कर्त्र
भिधायी न तस्मात् तृतीयया कर्ताभिधीयत इति निरवद्यं अनेनेत्यादिवाक्यं संक्षेपेण योजयति अनेनेत्यादिना पदार्थत्वं तत्तदवस्थाविशिष्टत्वं देवमनुष्याकार
विशिष्टत्वं न हि निराकारः पदार्थः पृथिवीत्वाकारविशिष्टो हि पृथिवीपदार्थः परमात्मपर्यन्तस्यैव वस्तुनस्तत्तदवस्थाविशिष्टत्वेन तत्तत्संज्ञत्वं तत्पर्यन्तस्य
देवादिनामभाक्त्वं चेत्याह एवंभूतस्यैवेति मृदात्मकोयं घट इतिवत् ब्रह्मात्मकत्वं स्वरूपैक्ये कथमुपपद्यते शरीरशरीरभावेन तादात्म्यमस्तु न तथासति किं प्रयो
जनं सर्वशब्दानां परमात्मपर्यन्तत्वे चेत् परमात्मनि देवत्वमनुष्यत्वादेः कृत्स्नस्य स्वहितत्वादेर्विसदृशस्य चायोगात् न तथाहि एतत्मुपपद्यत इति शङ्कायां वि
वरणवाक्यार्थमाह एतदुक्तं भवतीत्यादिना शरीरत्वमस्तु तत् किं तु तत्पर्यन्ताभिधानस्येत्यत्राह प्रकारत्वादिति प्रकारत्वं दण्डकुण्डलादेरप्यस्तीति तत्रापृथ
र्थक्शरीरतया प्रकारत्वादित्युक्तं एवं च ब्रह्मात्मकत्वं शरीरशरीरिभावादित्युक्तं आत्मशब्दः स्वरूपैक्ये शरीरशरीरिभावे च तथात्वं ब्रह्मशरीरशरीरि
भाव एवेति किं तन्नामरूपमिति चेत्तत्राह यस्येति जीवात्मा ब्रह्मणः शरीरमस्तु तत्किमित्यत्राह एवंभूतस्येति देवत्वादिविशिष्टशरीराणि जीवद्वारा ब्रह्मात्म
कानीत्यर्थः ननु किमित्यत्राह अत इति देवादीनां तत्तज्जातीयानामपि ब्रह्मपर्यन्तत्वं दर्शयितुं यदत्र ह्रस्वादय उपात्ताः अग्रे एतमेव सत्यात्मानं तत्त्वेनेति ला
क्षीर्धरादिभेदान् जानीहि विज्ञानविजृम्भितानि भूतानां प्राणिनः श्रेष्ठा इत्यादि मिलितोष्ठा काष्ठादेर्वा प्रथितत्वे अवगन्तव्ये शिलेत्याद्युक्तं भिन्नो द्
मोहितानां तत्र रूमा स्वस्थायि [illegible] विभागः तत्र तत्र स्थानवस्तु तत्र देवनेत्यनेन
परमात्मनि देवत्वमनुष्यत्वादिहिताद्यनुपपत्तिः परिहृता भवति देवत्वादिहितादीनां परमात्मस्वरूपे अन्वयाभावेन तथाभावेपि देवत्वादीनां प्रकृ

२० ःयदंप्रतिवस्तुमात्रद्व्रणेनांस्वपस्याप्यभिव्यंदर्शयितुंस्वपदेसामानाधिकरण्यानुगुण्यंविवक्ष्यतुतैकार्थप्रवृत्तित्वसिद्धिमाह तत्वमिति समानाधिकर
णप्रवृत्तयोरिति तत्वेत्यादिवाक्यद्वयेन तत्वमिति यदद्वयस्य प्रवृत्तिनिमित्तभेदसिद्धिमाह तत्वेशब्दोत्वद्ध्वार्थपरो भवतोततः किमित्यत आह तदेवमिति प्र
वृत्तिनिमित्तभेदेनैकार्थवृत्तित्वरूपं सामानाधिकरण्यं सिद्धमित्यर्थः तन्मतेसामानाधिकरण्यलक्षणसिद्धिः वाक्यांतरावगतसर्वज्ञत्वादिगुणविरुद्ध
महाभाष्ययमादिकस्यनीयं चेत्यभिप्रायेणहब्रह्मणइतिब्रह्मपर्यंतव्युत्पत्तिसंबंधेतेसर्वेपदार्थाः शब्दाश्च ब्रह्मपर्यंतानश्चेतत्ब्रह्मपर्यंततयापदार्थाः
प्रतिपद्येरन् शब्दाश्चतत्पर्यंततयाव्युत्पाद्येरन् नचतथाक्रियतेतस्मान्नामरूपयोर्ब्रह्मपर्यंतत्वमयुक्तमित्यत आह अस्तुतेतिपदार्थानांब्रह्मपर्यंतत
याग्रहणभावोवेदांतश्रवणरूपसामग्रीवैकल्यात् नत्वनत्याभावादित्यर्थः सर्वशब्दानांचेतिनस्मादेवसामग्रीवैकल्यादेवशब्दानांतत्पर्यंतव्युत्पत्त
भावइत्यर्थः नहिचक्षुषागंधग्रहणाभावेसतिगंधाभावइत्यर्थः सामग्र्यांसत्यांतत्पर्यंतत्वग्रहणं पूर्वंतत्पदार्थमात्रपर्यंतत्वग्रहणं सामग्रीवै
कल्यात्सुगोलेनगंधग्रहणेसतिचक्षुषागंधग्रहणाभावः सामग्र्याभावात् ननुशब्दानांव्यवहारसनेहोत्वादृश्यानांसिमित्रदृष्टानीवेदांतश्रवण भा
रूपसामग्रीसंभवेपि वेदांतवाक्यानितत्तत्पदार्थतनत्छब्दानांसापेक्षत्वेनयाब्रह्मपर्यंततत्त्वंबोधयितुं नशक्नुवंतीतिचोदयति नन्विति वेदांतवाक्या
निकिंव्युत्पत्तिनिरपेक्षाणिउतसापेक्षाणिव्युत्पत्तिनिरपेक्षाणिचेत् अव्युत्पन्नस्यापिबोधजनकानिस्युः सापेक्षाणिचेत् अन्यपर्यंततयाव्युत्पन्न
स्यशब्दस्यशब्दस्यान्यपर्यंतत्वंव्युत्पत्तिविरुद्धं नबोधयतिव्युत्पत्तेरवश्यसहसापेक्षत्वान्नहिरूढएकस्यपदार्थानामनन्यपर्यंतत्वंचनबोधयंतियथाआ
दित्योयूपइत्यादिवाक्यंतत्रव्युत्पत्त्यर्थशब्दस्यप्रत्यक्षसापेक्षत्वात्प्रत्यक्षविरुद्धंयूपादित्यतादात्म्यंहिनबोधयितुमलंतद्वाक्यंअत्रापितद्वदित्यर्थः
परिहरति नैवमित्यादिनायूपादित्यभेदविषयस्यप्रत्यक्षस्यान्यथासिद्धत्वात्तद्यूपादित्यतादात्म्यवादिवाक्यस्यारस्यभंजकेनतत्प्रत्यक्षत्वात्
10 अनएवहिप्रत्यक्षावगतज्वालैक्यस्यानन्यथासिद्धमनुमानंभंजकंदेहातिरिक्तात्मवादिवाक्यंदेहात्माभिमानस्यभंजकंतत्रहिज्वालैक्यमेकव
र्तिकावर्तित्वसादृश्यात्अन्यथासिद्धंदेहात्माभिमानविषयंप्रत्यक्षंचोदयंजलंभिन्नमितिव्रतसंसर्गेदन्यथासिद्धेतस्याज्ज्वालैक्यपक्षस्यदेहा
त्माभिमानविषयस्यचान्यथासिद्धस्यप्रत्यक्षस्यानुमानागमौभंजकौभवतः तत्रापिव्याप्तिलिंगधर्मिग्राहिप्रत्यक्षस्यानन्यथासिद्धत्वात्तेरवधि
तं एवमत्रापितत्तत्पदार्थपर्यंतत्वग्रहणमन्यथासिद्धंतत्पर्यंतत्वव्युत्पत्तिश्चान्यथासिद्धेतिप्रत्यक्षस्यानन्यथासिद्धागमेनअन्यथासिद्धंशब्दबोधयुक्त २०

जीवस्य ब्रह्मात्मकत्वं च न प्रत्यक्षादिप्रमाणप्रसिद्धं तस्माज्जीवमात्रपरत्वं शब्दः तं शङ्कावशान्जीवस्य न ह्यावृतस्य ब्रह्मणश्च सामानाधिकरण्येन प्रति
पाद्यमानमैक्यं स्वरूपैक्यमेव भवतीति चाद्यं परिहारस्तु ऐतदात्म्यमिति सर्वस्य ब्रह्मात्मकत्वस्य प्राप्तत्वात् तस्याप्राप्तमुपसंहार्यत्वात् सामान्येनोक्तस्य विशेष
